# ॥ શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રમ્ ૨ ॥

.. shrIlakShmIsahasranAmastotram 2 ..

sanskritdocuments.org

October 6, 2017

# .. shrIlakShmIsahasranAmastotram 2 ..

# ॥ શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રમ્ ૨ ॥

## Sanskrit Document Information

Text title : lakShmIsahasranAmastotram 2

File name : lakShmIsahasranAmastotram2.itx

Category : sahasranAma, devii, lakShmI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : October 6, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 6, 2017

*sanskritdocuments.org*

(નારદીયોપપુરાણતઃ)

મિત્રસહ ઉવાચ-
ભગવન્ સર્વધર્મજ્ઞ સર્વશાસ્ત્રવિશારદ ।
પાવનાનાં હિ મહસાં નિદાનં ત્વં મહામુને ॥ ૧॥

અતર્કિતેનાગમેન તવ તુષ્ટોઽસ્મિ સર્વદા ।
હૃદયં નિર્વૃતં મેઽદ્ય મહાદુઃખૌઘપીડિતમ્ ॥ ૨॥

દેવા ગૃહેષુ સન્તુષ્ટાઃ તારિતાઃ પિતરશ્ચ યે ।
ચિરાય મે મનસ્યસ્તિ સંશયો બલવત્તરઃ ॥ ૩॥

પૃચ્છામિ ત્વામહં તં વૈ ઉત્તરં દાતુમર્હસિ ।
ઇષ્ટં મયા ચ બહુભિઃ યજ્ઞૈસ્સમ્પૂર્ણદક્ષિણૈઃ ॥ ૪॥

દાનાનિ ચ મહાર્હાણિ પાત્રેષુ સ્પર્શિતાનિ ચ ।
અનૃતં નોક્તપૂર્વં મે પ્રજા ધર્મેણ પાલિતાઃ ॥ ૫॥

પતિવ્રતા મહાભાગા નિત્યં સુસ્નિગ્ધભાષિણી ।
પૂજ્યાન્ ગૃહાગતાન્ સર્વાનારાધયતિ નિત્યદા ॥ ૬॥

તથા હિ સેવતે દેવાન્ યથાઽહમપિ નાશકમ્ ।
ભાર્યાઽનુકૂલા મે દેવી મદયન્તી મનસ્વિની ॥ ૭॥

તથાપિ દુઃખં સમ્પ્રાપ્તં મયા દ્વાદશવાર્ષિકમ્ ।
રાક્ષસત્વં મહાઘોરં સમ્પૂર્ણનરકોપમમ્ ॥ ૮॥

તત્ર વૃત્તાનિ કાર્યાણિ સ્મૃત્વા મે વેપતે મનઃ ।
ભક્ષિતાઃ કતિ વા તત્ર દ્વિપદાશ્ચ ચતુષ્પદાઃ ॥ ૯॥

તત્સર્વમસ્તુ તન્નૈવ ચિન્ત્યતે શાપહેતુકમ્ ।
ગુરુપુત્રે ગુરુસમઃ શક્તિઃ સમ્ભક્ષિતો મયા ॥ ૧૦॥

બ્રહ્મહત્યાકૃતં પાપં કથં મે ન ભવિષ્યતિ ।
શાપાદ્રાક્ષસતા કાલે પ્રાપ્તા યદ્યપિ તન્મયા ॥ ૧૧॥

રાત્રિન્દિવં મે દહતિ હૃદયં હિ સબન્ધનમ્ ।
ન રોચતે મે ભુક્તિર્વા સુપ્તિર્વાપિ ગતિર્બહિઃ ॥ ૧૨॥

મહાબન્ધનમેતન્મે રાજ્યં હિ મનુતે મનઃ ।

કિન્નુ તત્કારણં યેન પ્રાપ્તોઽહં તાદૃશીં શુચમ્ ॥ ૧૩॥

વક્તુમર્હસિ સર્વજ્ઞ તત્પ્રાયશ્ચિત્તવિસ્તરમ્ ।
ઉપાદિશ મહામન્ત્રતન્ત્રજ્ઞ પ્રણતાય મે ॥ ૧૪॥

શ્રીનારદ ઉવાચ-
શૃણુ રાજન્પ્રવક્ષ્યામિ પ્રાગ્જન્મચરિતં તવ ।
યેનેદૃશં ત્વયા પ્રાપ્તં દુઃખમત્યન્તદુસ્સહમ્ ॥ ૧૫॥

પુરાભૂદ્બ્રાહ્મણઃ કશ્ચિત્તામ્રપર્ણિનદીતટે ।
દરિદ્રોઽત્યન્તદુર્ભાગ્યઃ બહુપુત્રકુટુમ્બવાન્ ॥ ૧૬॥

કૃષ્ણશર્મેતિ વિખ્યાતઃ વેદવેદાઙ્ગતત્વવિત્ ।
તવ ભાર્યાઽભવત્પુણ્યા સદા ચણ્ડી કુરૂપિણી ॥ ૧૭॥

કિન્તુ શક્તિવ્રતાચારેઽપ્રતિમા શુદ્ધમાનસા ।
કટુવાઙ્માનિની નામ્ના ક્ષુત્પિપાસાર્દિતા સદા ॥ ૧૮॥

દારિદ્ર્યશમનાર્થં ત્વં સર્વલક્ષણલક્ષિતમ્ ।
કલ્પયિત્વ શ્રિયો મૂર્તિં ભક્ત્યા પૂજિતવાન્ગૃહે ॥ ૧૯॥

માનિન્યપ્યન્વહં ભક્ત્યા ગોમયાલેપનાદિભિઃ ।
રઙ્ગવલ્યાપ્યલઙ્કૃત્ય પૂજાસ્થાનં ગૃહે તવ ॥ ૨૦॥

પાયસાપૂપનૈવેદ્યૈઃ સા ત્વાં પર્યચરન્મુદા ।
એકદા ભૃગુવારે ત્વાં સહસ્રકમલાર્ચનમ્ ॥ ૨૧॥

વિધાતું વિષ્ણુપત્ન્યાસ્તુ પદ્માન્ચાનયિતું ગતઃ ।
ગતેઽર્ધદિવસે ગેહં પ્રાપ્ય ખિન્નોઽનયોદિતઃ ॥ ૨૨॥

હન્તાર્ધદિવસોઽતીતઃ કદા દેવાનસઙ્ખ્યકાન્ ।
અભ્યર્ચ્યાથ શ્રિયો દેવ્યાઃ સહસ્રકમલાર્ચનમ્ ॥ ૨૩॥

કૃત્વા ભુક્ત્વા કદાઽન્નં નો દર્શયિષ્યસિ તામ્યતામ્ ।
બાલા રુદન્તિ ક્ષુધિતાઃ પક્વં ભવતિ શીતલમ્ ॥ ૨૪॥

ઇતિ તસ્યાં ભર્ત્સયન્ત્યાં તૂષ્ણીં પૂજામધાદ્ભવાન્ ।
સહસ્રપદ્મપૂજાયાં ચલન્ત્યાં મધ્યતસ્તુ સા ॥ ૨૫॥

અસમર્થા ક્ષુધં સોઢું બાલૈસ્સહ બુભોજ હ ।

તદા ત્વં કુપિતોઽપ્યેનાં ન ચ કિઞ્ચિદપિ બ્રુવન્ ॥ ૨૬॥

ગૃહાન્નિર્ગત્ય શાન્તાત્મા કિં કૃત્યમિતિ ચિન્તયન્ ।
નિર્યાન્તં ત્વાં તુ સા પ્રાહ ક્વ ગચ્છસિ સુદુર્મતે ॥ ૨૭॥

અનિર્વર્ત્યં શ્રિયઃ પૂજાં પ્રારબ્ધાં સુમહાદરમ્ ।
પૃથઙ્નૈવેદ્યમસ્તીહ નાસ્માભિર્ભક્ષિતં હિ તત્ ॥ ૨૮॥

કાલાત્યયાત્ક્ષુધાર્તાનાં ભુક્તિં દેવી સહિષ્યતે ।
તદ્વિધેહિ શ્રિયઃ પૂજાં મા સ્મ નિષ્કારણં ક્રુધઃ ॥ ૨૯॥

નરકે મા પતો બુદ્ધ્યા માં ચ પાતય મા વૃથા ।
ઇતિ તસ્યાં બ્રુવાણાયાં ત્વં ગૃહાન્નિરગાઃ ક્રુધા ॥ ૩૦॥

સદ્યઃ સન્યસ્ય વિપિનેઽવાત્સીસ્ત્વં વિધિના કિલ ।
યતિત્વેઽપિ સદા બુદ્ધ્યા પૂર્વાશ્રમકથાં સ્મરન્ ॥ ૩૧॥

દારિદ્ર્યં સર્વધર્માણાં પ્રત્યૂહાય પ્રવર્તતે ।
સત્યપ્યસ્મિન્ધર્મપત્ની અનુકૂલા ભવેદ્યદિ ॥ ૩૨॥

નરસ્ય જન્મ સુખિતં નાન્યથાઽર્થશતૈરપિ ।
વન્ધ્યાજાનિસ્સ ભવતુ અનુકૂલકલત્રવાન્ ॥ ૩૩॥

લભતે જન્મસાફલ્યમેતદ્દેવ્યાઃ પ્રસાદજમ્ ।
ઇત્યેવં ચિન્તયન્નેવ ત્યક્ત્વા દેહં તરોસ્તલે ॥ ૩૪॥

ઇક્ષ્વાકુવંશે જાતસ્ત્વં રાજા મિત્રસહાભિધઃ ।
રુષા પરવશો યસ્માદસમાપ્ય શ્રિયોઽર્ચનમ્ ॥ ૩૫॥

નિર્ગતોઽસિ ગૃહાત્તસ્માદ્દુઃખમેતદુપસ્થિતમ્ ।
સાપિ ત્વયિ વિનિર્યાતે પશ્ચાત્તાપવતી ભૃશમ્ ॥ ૩૬॥

પ્રક્ષાલિતાઙ્ઘ્રિહસ્તાઽથ પ્રયતાઽઽચમ્ય સત્વરમ્ ।
નૈવેદ્યં સ્વયમીશ્વર્યૈ પ્રણમ્ય ચ નિવેદ્ય ચ ॥ ૩૭॥

અમ્બ સર્વસ્ય લોકસ્ય જનન્યસિ સહસ્વ તત્ ।
આગાંસિ મમ નાગારિકેતનોરઃસ્થલાલયે ॥ ૩૮॥

યસ્યાં જાતૌ તુ મે ભર્તા તત્પૂજાપુણ્યતો ભવેત્ ।
ભવેયમહમપ્યત્ર જાતૌ તં ચાપ્નુયાં યથા ॥ ૩૯॥

કામક્રોધાદિહીના સ્યાં તથામ્બાનુગ્રહં કુરુ ।
ઇતિ દેવીં પ્રાર્થયન્તી જીવન્તી કૃચ્છ્રતો ભુવિ ॥ ૪૦॥

ત્યક્ત્વા દેહં પુનર્જાતા રાજવંશે સુપાવને ।
મદયન્તીતિ નામ્ના વૈ તવ ભાર્યાઽભવત્પુનઃ ॥ ૪૧॥

અભુક્તે ત્વયિ ભુક્ત્વા સા વન્ધ્યા જાતા વધૂમણિઃ ।
ઉભયોર્ભવતોર્લક્ષ્મીપૂજાયામપરાધતઃ ॥ ૪૨॥

ઉભાવપિ મહાદુઃખં પ્રાપ્તૌ દ્વાદશવર્ષિકમ્ ।
ત્યક્ત્વા રાજ્યં ચ કોશઞ્ચ દરિદ્રાવતિદુઃખિતૌ ॥ ૪૩॥

મા બ્રહ્મહત્યાદોષાત્ત્વં ભૈષી રાજન્ કથઞ્ચન ।
યાં જાતિમનુવિષ્ટો હિ તાદૃશીં ત્વં ક્રિયામધાઃ ॥ ૪૪॥

કિન્તુ ભૂયશ્ચ્યુતે રાજ્યાદ્ભેતવ્યં શ્રીપ્રકોપતઃ ।
નામ્નાં તદદ્ય શ્રીદેવ્યાઃ સહસ્રેણ શતેન ચ ॥ ૪૫॥

અષ્ટોત્તરેણ પદ્માનાં પુઞ્જતસ્તાં પ્રપૂજય ।
ભવેત્તવ સ્થિરં રાજ્યં દુઃખં નાણ્વપિ તે ભવેત્ ॥ ૪૬॥

ભાર્યા તે સાપિ શુશ્રૂષાં સ્વયમેવ કરોતુ તે ।
વર્ષમાત્રં પૂજિતા સા લક્ષ્મીર્નારાયણપ્રિયા ॥ ૪૭॥

યુવયોસ્સર્વકામાનાં દાત્રી સ્યાન્નાત્ર સંશયઃ ।
સ્ત્રીસઙ્ગપ્રતિહન્તાઽસ્તિ શાપો યદ્યપિ તે પ્રભો ॥ ૪૮॥

પ્રસોષ્યતે ચ તનયં તવ ભાર્યા કથઞ્ચન ।
પુત્રપૌત્રાભિવૃદ્ધ્યા ત્વં મોદિષ્યસિ મહેન્દ્રવત્ ॥ ૪૯॥

યથા પૃષ્ટં મહાભાગ દુઃખહેતુસ્તવોદિતઃ ।
ઉક્તસ્તત્પરિહારોઽપિ કિમિચ્છસિ પુનર્વદ ॥ ૫૦॥

રાજોવાચ-
ધન્યોઽસ્મ્યનુગૃહીતોઽસ્મિ મહર્ષે કૃપયા તવ ।
મત્તો ન વિદ્યતે કશ્ચિલ્લોકેઽસ્મિન્ ભાગ્યવત્તરઃ ॥ ૫૧॥

તવ પાદાબ્જયુગલે પ્રણામાનાં શતં શતમ્ ।

કરોમિ પાહિ માં વિપ્ર કુલોત્તંસ દયાનઘ ॥ ૫૨॥

નામ્નાં સહસ્રં શ્રીદેવ્યા અષ્ટોત્તરશતાધિકમ્ ।
પ્રબ્રૂહિ મે મુનિશ્રેષ્ઠ પૂજાયા વિધિમપ્યથ ॥ ૫૩॥

જપસ્ય ચ વિધિં તેષાં નામ્નાં શુશ્રૂષવે વદ ।
સૂત ઉવાચ-
ઇતિ રાજ્ઞા મુનિશ્રેષ્ઠઃ પૃષ્ટસ્સવિનયં તતઃ ॥ ૫૪॥

નમસ્કૃત્ય શ્રિયૈ પશ્ચાદ્ધ્યાત્વોવાચ મહીપતિમ્ ।
શ્રીનારદ ઉવાચ-
સમ્યક્ પૃષ્ટં મહારાજ સર્વલોકહિતં ત્વયા ॥ ૫૫॥

વક્ષ્યામિ તાનિ નામાનિ પૂજાઞ્ચાપિ યથાક્રમમ્ ।
પલમાનસુવર્ણેન રજતેનાથ તામ્રતઃ ॥ ૫૬॥

ચતુર્ભુજાં પદ્મધરાં વરાભયવિશોભિનીમ્ ।
નિષણ્ણાં ફુલ્લકમલે ચતુર્દન્તૈઃ સિતૈર્ગજૈઃ ॥ ૫૭॥

સુવર્ણઘણ્ટામુખરૈઃ કૃતક્ષીરાભિષેચનામ્ ।
કટકાઙ્ગદમઞ્જીરરશનાદિ વિભૂષણૈઃ ॥ ૫૮॥

વિભૂષિતાં ક્ષૌમવસ્ત્રાં સિન્દૂરતિલકાઞ્ચિતામ્ ।
પ્રસન્નવદનામ્ભોજાં પ્રપન્નાર્તિવિનાશિનીમ્ ॥ ૫૯॥

છત્રચામરહસ્તાઢ્યૈઃ સેવિતામપ્સરોગણૈઃ ।
કૃત્વૈવં પ્રતિમાં તાં ચ પ્રતિષ્ઠાપ્ય યથાવિધિ ॥ ૬૦॥

શ્રીં લક્ષ્મ્યૈ નમ ઇત્યેવ ધ્યાનાવાહનપૂર્વકાન્ ।
ઉવચારાંશ્ચતુષ્ષષ્ટિં કલ્પયેત ગૃહે સુધીઃ ॥ ૬૧॥

પ્રતિમાયા અલાભે તુ લક્ષ્મ્યાસ્સમ્પ્રાપ્ય ચાલયમ્ ।
કારયેદુપચારાંસ્તુ યથાવિધ્યર્ચકૈર્મુદા ॥ ૬૨॥

તસ્યાપ્યભાવે ત્વાલેખ્યે લિખિતાં વર્ણકૈસ્તથા ।
પૂજયેત્તસ્ય ચાભાવે કૃતાં ચન્દનદારુણા ॥ ૬૩॥

તદભાવે ચન્દનેન રચિતાં પૂજયેદ્રમામ્ ।
એષામભાવે વિકચે કમલે કર્ણિકાગતામ્ ॥ ૬૪॥

ધ્યાત્વા તથાવિધાં દેવીમાદરેણ પ્રપૂજયેત્ ।
કમલાનાં સહસ્રેણાપ્યષ્ટોત્તરશતેન ચ ॥ ૬૫॥

અર્ચયેદિન્દિરાપાદૌ ધ્યાત્વાભીષ્ટાનિ ચેતસિ ।
શ્રીદેવ્યા નામસાહસ્રં અષ્ટોત્તરશતાધિકમ્ ॥ ૬૬॥

અથાતસ્સમ્પ્રવક્ષ્યામિ શૃણુ નાન્યમના નૃપ ।
પારાયણપ્રકારઃ ॥

ૐ અસ્ય શ્રીમહાલક્ષ્મીસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય નારદ ઋષિઃ ।
અનુષ્ટુપછન્દઃ । શ્રીમહાલક્ષ્મીર્દેવતા ।
હ્રાં બીજમ્ । હ્રિં શક્તિઃ । હૂં કીલકમ્ ।
શ્રીમહાલક્ષ્મીપ્રસાદસિદ્ધ્યર્થે
શ્રીમહાલક્ષ્મીસહસ્રનામમન્ત્રજપે વિનિયોગઃ ॥

ૐ હ્લાં હિરણ્યવર્ણાં હરિણીં સુવર્ણરજતસ્રજામ્ । અઙ્ગુષ્ઠાભ્યાણ્ નમઃ ।
મં હ્લીં ચન્દ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો ન આવહ । તર્જનીભ્યાં નમઃ ।
હાં હ્લૂ તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ । મધ્યમાભ્યાં નમઃ ।
લં હ્લૈં યસ્યાં હિરણ્યં વિન્દેયં ગામશ્વમ્પુરુષાનહમ્ । અનામિકાભ્યાં નમઃ ।
ક્ષ્મ્યૈં હ્લૌં શ્રિયં દેવીમુપહ્વયે શ્રીર્મા દેવી જુષતમ્ ।
કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ૐ હ્લાં કાંસોસ્મિતાં હિરણ્યપ્રાકારામાર્દ્રાં જ્વલન્તીં તૃપ્તાં તર્પયન્તીમ્ ।
હૃદયાય નમઃ ।
મં હ્લીં પદ્મે સ્થિતાં પદ્મવર્ણાં તામિહોપહ્વયે શ્રિયમ્ ।
શિરસે સ્વાહા ।
હાં હ્લૂ ચન્દ્રાં પ્રભાસાં યશસા જ્વલન્તીં શ્રિયં લોકે દેવજુષ્ટામુદારામ્ ।
શિખાયૈ વષટ્ ।
લં હ્લૈં તાં પદ્મિનીમીં શરણમહં પ્રપદ્યેઽલક્ષ્મીર્મે
નશ્યતાં ત્વાં વૃણે ।
કવચાય હુમ્ ।
ક્ષ્મ્યૈં હ્રૌં આદિત્યવર્ણે તપસોઽધિજાતો વનસ્પતિસ્તવ
વૃક્ષોઽથ બિલ્વઃ । નેત્રત્રયાય વૌષટ્ ।
નમઃ હ્લઃ તસ્ય ફલાનિ તપસા નુદાન્તુ માયાન્તરાયાશ્ચ બાહ્યા અલક્ષ્મીઃ ।

અસ્ત્રાય ફટ્ । ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્-
લક્ષ્મીદેવીં દ્વિપદ્માભયવરદકરાં તપ્તકાર્તસ્વરાભાં
શુભ્રાભ્રાભેભયુગ્મદ્વયકરધૃતકુમ્ભાદ્ભિરાસિચ્યમાનામ્ ।
રત્નૌઘાબદ્ધમૌલિં વિમલતરદુકૂલાર્તવાલેપનાઢ્યાં
પદ્માક્ષીં પદ્મનાભોરસિ કૃતવસતિં પદ્મગાં ચિન્તયામિ ॥

લં પૃથિવ્યાત્મિકાયૈ ગન્ધં સમર્પયામિ ।
હં આકાશાત્મિકાયૈ પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મિકાયૈ ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મિકાયૈ । દીપં દર્શયામિ ।
વં અમૃતાત્મિકાયૈ । અમૃતં નિવેદયામિ ।
સં સર્વાત્મિકાયૈ સર્વોપચારાન્ સમર્પયામિ ।
પારાયણાન્તે ૐ હ્રાં ઉપૈતુ માં દેવસખઃ કીર્તિશ્ચ મણિના સહ ।
હૃદયાય નમઃ ।
મં હ્રીં પ્રાદુર્ભૂતોઽસ્મિ રાષ્ટ્રેઽસ્મિન્કીર્તિમૃદ્ધિં દદાતુ મે ।
શિરસે સ્વાહા ।
હાં હ્રૂં ક્ષુત્પિપાસામલાં જ્યેષ્ઠાં અલક્ષ્મીં નાશયામ્યહમ્ ।
શિખાયૈ વષટ્ ।
લં હ્રૈં અભૂતિમસમૃદ્ધિઞ્ચ સર્વાં નિર્ણુદ મે ગૃહાત્ ।
કવચાય હુમ્ ।
ક્ષ્મ્યૈં હ્રૌં ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
નેત્રત્રયાય વૌષટ્ ।
નમઃ હ્રઃ ઈશ્વરીં સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ।
અસ્ત્રાય હટ્ ॥

ભૂર્ભુવસ્સુવરોમિતિ દિગ્વિમોકઃ ।

ધ્યાનમ્ ।
લમિત્યાદિ પઞ્ચપૂજા ।

અથ શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રમ્ ॥

શ્રીનારદ ઉવાચ -

મહાલક્ષ્મીર્મહેશાના મહામાયા મલાપહા ।
વિષ્ણુપત્ની વિધીશાર્ચ્યા વિશ્વયોનિર્વરપ્રદા ॥ ૧॥

ધાત્રી વિધાત્રી ધર્મિષ્ઠા ધમ્મિલ્લોદ્ભાસિમલ્લિકા ।
ભાર્ગવી ભક્તિજનની ભવનાથા ભવાર્ચિતા ॥ ૨॥

ભદ્રા ભદ્રપ્રદા ભવ્યા ભક્તાભીષ્ટફલપ્રદા ।
પ્રળયસ્થા પ્રસિદ્ધા મા પ્રકૃષ્ટૈશ્વર્યદાયિની ॥ ૩॥

વિષ્ણુશક્તિર્વિષ્ણુમાયા વિષ્ણુવક્ષઃસ્થલસ્થિતા ।
વાગ્રૂપા વાગ્વિભૂતિજ્ઞા વાક્પ્રદા વરદા વરા ॥ ૪॥

સમ્પત્પ્રદા સર્વશક્તિઃ સંવિદ્રૂપા સમાऽસમા ।
હરિદ્રાભા હરિન્નાથપૂજિતા હરિમોહિની ॥ ૫॥

હતપાપા હતખલા હિતાહિતવિવર્જિતા ।
હિતાહિતપરાऽહેયા હર્ષદા હર્ષરૂપિણી ॥ ૬॥

વેદશાસ્ત્રાલિસંસેવ્યા વેદરૂપા વિધિસ્તુતા ।
શ્રુતિઃ સ્મૃતિર્મતિઃ સાધ્વી શ્રુતાऽશ્રુતધરા ધરા ॥ ૭॥

શ્રીઃ શ્રિતાઘધ્વાન્તભાનુઃ શ્રેયસી શ્રેષ્ઠરૂપિણી ।
ઇન્દિરા મન્દિરાન્તસ્થા મન્દુરાવાસિની મહી ॥ ૮॥

ધનલક્ષ્મીર્ધનકરી ધનિપ્રીતા ધનપ્રદા ।
ધાનાસમૃદ્ધિદા ધુર્યા ધુતાઘા ધૌતમાનસા ॥ ૯॥

ધાન્યલક્ષ્મીર્દારિતાઘા દારિદ્ર્યવિનિવારિણી ।
વીરલક્ષ્મીર્વીરવન્દ્યા વીરખડ્ગાગ્રવાસિની ॥ ૧૦॥

અક્રોધનાऽલોભપરા લલિતા લોભિનાશિની ।
લોકવન્દ્યા લોકમાતા લોચનાધઃકૃતોત્પલા ॥ ૧૧॥

હસ્તિહસ્તોપમાનોરુઃ હસ્તદ્વયધૃતામ્બુજા ।
હસ્તિકુમ્ભોપમકુચા હસ્તિકુમ્ભસ્થલસ્થિતા ॥ ૧૨॥

રાજલક્ષ્મી રાજરાજસેવિતા રાજ્યદાયિની ।
રાકેન્દુસુન્દરી રસ્યા રસાલરસભાષણા ॥ ૧૩॥

કોશવૃદ્ધિઃ કોટિદાત્રી કોટિકોટિરવિપ્રભા ।

કર્મારાદ્ધ્યા કર્મગમ્યા કર્મણાં ફલદાયિની ॥ ૧૪॥

ધૈર્યપ્રદા ધૈર્યરૂપા ધીરા ધીરસમર્ચિતા ।
પતિવ્રતા પરતરપુરુષાર્થપ્રદાઽપરા ॥ ૧૫॥

પદ્માલયા પદ્મકરા પદ્માક્ષી પદ્મધારિણી ।
પદ્મિની પદ્મદા પદ્મા પદ્મશઙ્ખાદિસેવિતા ॥ ૧૬॥

દિવ્યા દિવ્યાઙ્ગરાગાઢ્યા દિવ્યાદિવ્યસ્વરૂપધૃત્ ।
દયાનિધિર્દાનપરા દાનવારાતિભામિની ॥ ૧૭॥

દેવકાર્યપરા દેવી દૈત્યેન્દ્રપરિપૂજિતા ।
નારાયણી નાદગતા નાકરાજસમર્ચિતા ॥ ૧૮॥

નક્ષત્રનાથવદના નરસિંહપ્રિયાઽનલા ।
જગદ્રૂપા જગન્નાથા જઙ્ગમાજઙ્ગમાકૃતિઃ ॥ ૧૯॥

કવિતા કઞ્જનિલયા કમ્રા કલિનિષેધિની ।
કારુણ્યસિન્ધુઃ કમલા કમલાક્ષી કુચોન્નતા ॥ ૨૦॥

બલિપ્રિયા બલિહરી બલિની બલિસંસ્તુતા ।
હીરભૂષા હીનદોષા હાનિહર્ત્રી હતાસુરા ॥ ૨૧॥

હવ્યકવ્યાર્ચિતા હત્યાદિકપાતકનાશિણી ।
વિશુદ્ધસત્ત્વા વિવશા વિશ્વબાધાહરી વધૂઃ ॥ ૨૨॥

બ્રહ્માણી બ્રહ્મજનની બ્રહ્મરૂપા બૃહદ્વપુઃ ।
બન્દીકૃતામરવધૂમોચિની બન્ધુરાલકા ॥ ૨૩॥

બિલેશયાઙ્ગનાવન્દ્યા બીભત્સરહિતાઽબલા ।
ભોગિની ભુવનાધીશા ભોગિભોગશયાઽભયા ॥ ૨૪॥

દામોદરપ્રિયા દાન્તા દાશેશપરિસેવિતા ।
જામદગ્ન્યપ્રિયા જહ્નુતનયા પાવનાઙ્ઘિરકા ॥ ૨૫॥

ક્ષીરોદમથનોદ્ભૂતા ક્ષીરાક્તા ક્ષિતિરૂપિણી ।
ક્ષેમઙ્કરી ક્ષયકરી ક્ષેત્રજ્ઞા ક્ષેત્રદાયિની ॥ ૨૬॥

સ્વયંવૃતાચ્યુતા સ્વીયરક્ષિણી સ્વત્વદાયિની ।
તારકેશમુખી તાર્ક્ષ્યસ્વામિની તારિતાશ્રિતા ॥ ૨૭॥

ગુણાતીતા ગુણવતી ગુણ્યા ગરુડસંસ્થિતા ।
ગેયા ગયાક્ષેત્રગતા ગાનતુષ્ટા ગતિપ્રદા ॥ ૨૮॥

શેષરૂપા શેષશાયિભામિની શિષ્ટસમ્મતા ।
શેવધિઃ શોષિતાશેષભુવના શોભનાકૃતિઃ ॥ ૨૯॥

પાઞ્ચરાત્રાર્ચિતા પાઞ્ચજન્યધાર્યઙ્કવાસિની ।
પાષણ્ડદ્વેષિણી પાશમોચની પામરપ્રિયા ॥ ૩૦॥

ભયઙ્કરી ભયહરી ભર્તૃભક્તા ભવાપહા ।
હ્રીર્હ્રીમતી હૃતતમાઃ હતમાયા હતાશુભા ॥ ૩૧॥

રઘુવંશસ્નુષા રામા રમ્યા રામપ્રિયા રમા ।
સીરધ્વજસુતા સીતા સીમાતીતગુણોજ્જ્વલા ॥ ૩૨॥

જાનકી જગદાનન્દદાયિની જગતીભવા ।
ભૂગર્ભસમ્ભવા ભૂતિઃ ભૂષિતાઙ્ગી ભૃતાનતા ॥ ૩૩॥

વેદસ્તવા વેદવતી વૈદેહી વેદવિત્પ્રિયા ।
વેદાન્તવેદ્યા વીર્યાઢ્યા વીરપત્ની વિશિષ્ટધીઃ ॥ ૩૪॥

શિવચાપારોપપણા શિવા શિવપરાર્ચિતા ।
સાકેતવાસિની સાધુસ્વાન્તગા સ્વાદુભક્ષિણી ॥ ૩૫॥

ગુહાગતા ગુહનતા ગુહાગતમુનિસ્તુતા ।
દરસ્મિતા દનુજસંહર્ત્રી દશરથસ્નુષા ॥ ૩૬॥

દાયપ્રદા દાનફલા દક્ષા દાશરથિપ્રિયા ।
કાન્તા કાન્તારગા કામ્યા કારણાતીતવિગ્રહા ॥ ૩૭॥

વીરા વિરાધસંહર્ત્રી વિશ્વમાયાવિધાયિની ।
વેદ્યા વૈદ્યપ્રિયા વૈદ્યા વેધોવિષ્ણુશિવાકૃતિઃ ॥ ૩૮॥

ખરદૂષણકાલાગ્નિઃ ખરભાનુકુલસ્નુષા ।
શૂરા શૂર્પણખાભઙ્ગકારિણી શ્રુતવલ્લભા ॥ ૩૯॥

સુવર્ણમૃગતૃષ્ણાઢ્યા સુવર્ણસદૃશાઙ્ગકા ।
સુમિત્રાસુખદા સૂતસંસ્તુતા સુતદારદા ॥ ૪૦॥

સુમિત્રાનુગ્રહપરા સુમન્ત્રા સુપ્રતિષ્ઠિતા ।
શ્યામા શ્યામલનેત્રાન્તા શ્યામન્યગ્રોધસેવિની ॥ ૪૧॥

તુઙ્ગસ્થાનપ્રદા તુઙ્ગા ગઙ્ગાપ્રાર્થનતત્પરા ।
ગતિપ્રિયા ગર્ભરૂપા ગતિર્ગતિમતી ચ ગૌઃ ॥ ૪૨॥

ગર્વદૂરા ગર્વહરી ગતિનિર્જિતહંસિકા ।
દશાનનવધોદ્યુક્તા દયાસિન્ધુર્દશાતિગા ॥ ૪૩॥

સેતુહેતુર્હેતુહીના હેતુહેતુમદાત્મિકા ।
હનૂમત્સ્વામિની હૃષ્ટા હૃષ્ટપુષ્ટજનસ્તુતા ॥ ૪૪॥

વામકેશી વામનેત્રી વાદ્યા વાદિજયપ્રદા ।
ધનધાન્યકરી ધર્મ્યા ધર્માધર્મફલપ્રદા ॥ ૪૫॥

સમુદ્રતનયા સ્તુત્યા સમુદ્રા સદ્રસપ્રદા ।
સામપ્રિયા સામનુતા સાન્ત્વોક્તિઃ સાયુધા સતી ॥ ૪૬॥

શીતીકૃતાગ્નિઃ શીતાંશુમુખી શીલવતી શિશુઃ ।
ભસ્મીકૃતાસુરપુરા ભરતાગ્રજભામિની ॥ ૪૭॥

રાક્ષસીદુઃખદા રાજ્ઞી રાક્ષસીગણરક્ષિણી ।
સરસ્વતી સરિદ્રૂપા સન્નુતા સદ્ગતિપ્રદા ॥ ૪૮॥

ક્ષમાવતી ક્ષમાશીલા ક્ષમાપુત્રી ક્ષમાપ્રદા ।
ભર્તૃભક્તિપરા ભર્તૃદૈવતા ભરતસ્તુતા ॥ ૪૯॥

દૂષણારાતિદયિતા દયિતાલિઙ્ગનોત્સુકા ।
અલ્પમધ્યાઽલ્પધીદૂરા કલ્પવલ્લી કલાધરા ॥ ૫૦॥

સુગ્રીવવન્દ્યા સુગ્રીવા વ્યગ્રીભાવાવિતાનતા ।
નીલાશ્મભૂષા નીલાદિસ્તુતા નીલોત્પલેક્ષણા ॥ ૫૧॥

ન્યાય્યા ન્યાયપરાઽઽરાધ્યા ન્યાયાન્યાયફલપ્રદા ।
પુણ્યદા પુણ્યલભ્યા ચ પુરુષોત્તમભામિની ॥ ૫૨॥

પુરુષાર્થપ્રદા પુણ્યા પણ્યા ફણિપતિસ્તુતા ।
અશોકવનિકાસ્થાનાઽશોકા શોકવિનાશિની ॥ ૫૩॥

શોભારૂપા શુભા શુભ્રા શુભ્રદન્તા શુચિસ્મિતા ।

પુરુહૂતસ્તુતા પૂર્ણા પૂર્ણરૂપા પરેશયા ॥ ૫૪॥

દર્ભાગ્રધીર્દહરગા દર્ભબ્રહ્માસ્ત્રભામિની ।
ત્રૈલોક્યમાતા ત્રૈલોક્યમોહિની ત્રાતવાયસા ॥ ૫૫॥

ત્રાણૈકકાર્યા ત્રિદશા ત્રિદશાધીશસેવિતા ।
લક્ષ્મણા લક્ષ્મણારાધ્યા લક્ષ્મણાગ્રજનાયિકા ॥ ૫૬॥

લઙ્કાવિનાશિની લક્ષ્યા લલના લલિતાશયા ।
તારકાખ્યપ્રિયા તારા તારિકા તાર્ક્ષ્યગા તરિઃ ॥ ૫૭॥

તાટકારાતિમહિષી તાપત્રયકુઠારિકા ।
તામ્રાધરા તાર્ક્ષ્યનુતા તામ્રાક્ષી તારિતાનતા ॥ ૫૮॥

રઘુવંશપતાકા શ્રીરઘુનાથસધર્મિણી ।
વનપ્રિયા વનપરા વનજાક્ષી વિનીતિદા ॥ ૫૯॥

વિદ્યાપ્રિયા વિદ્વદીડ્યા વિદ્યાઽવિદ્યાવિનાશિની ।
સર્વાધારા શમપરા શરભઙ્ગમુનિસ્તુતા ॥ ૬૦॥

બિલ્વપ્રિયા બલિમતી બલિસંસ્તુતવૈભવા ।
બલિરાક્ષસસંહર્ત્રી બહુકા બહુવિગ્રહા ॥ ૬૧॥

ક્ષત્રિયાન્તકરારાતિભાર્યા ક્ષત્રિયવંશજા ।
શરણાગતસંરક્ષા શરચાપાસિપૂજિતા ॥ ૬૨॥

શરીરભાજિતરતિઃ શરીરજહરસ્તુતા ।
કલ્યાણી કરુણામૂર્તિઃ કલુષઘ્ની કવિપ્રિયા ॥ ૬૩॥

અચક્ષુરશ્રુતિરપાદાપ્રાણા ચામના અધીઃ ।
અપાણિપાદાઽપ્યવ્યક્તા વ્યક્તા વ્યઞ્જિતવિષ્ટપા ॥ ૬૪॥

શમીપ્રિયા સકલદા શર્મદા શર્મરૂપિણી ।
સુતીક્ષ્ણવન્દનીયાઙ્ઘ્રિઃ સુતવદ્વત્સલા સુધીઃ ॥ ૬૫॥

સુતીક્ષ્ણદણ્ડા સુવ્યક્તા સુતીભૂતજગત્ત્રયા ।
મધુરા મધુરાલાપા મધુસૂદનભામિની ॥ ૬૬॥

માધ્વી ચ માધવસતી માધવીકુસુમપ્રિયા ।
પરા પરભૃતાલાપા પરાપરગતિપ્રદા ॥ ૬૭॥

વાલ્મીકિવદનામ્ભોધિસુધા બલિરિપુસ્તુતા ।
નીલાઙ્ગદાદિવિનુતા નીલાઙ્ગદવિભૂષિતા ॥ ૬૮॥

વિદ્યાપ્રદા વિયન્મધ્યા વિદ્યાધરકૃતસ્તવા ।
કુલ્યા કુશલદા કલ્યા કલા કુશલવપ્રસૂઃ ॥ ૬૯॥

વશિની વિશદા વશ્યા વન્દ્યા વન્દારુવત્સલા ।
માહેન્દ્રી મહદા મહ્યા મીનાક્ષી મીનકેતના ॥ ૭૦॥

કમનીયા કલામૂર્તિઃ કુપિતાઽકુપિતા કૃપા ।
અનસૂયાઙ્ગરાગાઙ્કાઽનસૂયા સૂરિવન્દિતા ॥ ૭૧॥

અમ્બા બિમ્બાધરા કમ્બુકન્ધરા મન્થરા ઉમા ।
રામાનુગાઽઽરામચરી રાત્રિઞ્ચરભયઙ્કરી ॥ ૭૨॥

એકવેણીધરા ભૂમિશયના મલિનામ્બરા ।
રક્ષોહરી ગિરિલસદ્વક્ષોજા જ્ઞાનવિગ્રહા ॥ ૭૩॥

મેધા મેધાવિની મેધ્યા મૈથિલી માતૃવર્જિતા ।
અયોનિજા વયોનિત્યા પયોનિધિસુતા પૃથુઃ ॥ ૭૪॥

વાનરર્ક્ષપરીવારા વારિજાસ્યા વરાન્વિતા ।
દયાર્દ્રાઽભયદા ભદ્રા નિદ્રામુદ્રા મુદાયતિઃ ॥ ૭૫॥

ગૃધ્રમોક્ષપ્રદા ગૃધ્નુઃ ગૃહીતવરમાલિકા ।
શ્વશ્રેયસપ્રદા શશ્વદ્ભવા શતધૃતિપ્રસૂઃ ॥ ૭૬॥

શરત્પદ્મપદા શાન્તા શ્વશુરાર્પિતભૂષણા ।
લોકાધારા નિરાનન્દા નીરાગા નીરજપ્રિયા ॥ ૭૭॥

નીરજા નિસ્તમા નિઃસ્વા નીરીતિર્નીતિનૈપુણા ।
નારીમણિર્નરાકારા નિરાકારાઽનિરાકૃતા ॥ ૭૮॥

કૌમારી કૌશલનિધિઃ કૌશિકી કૌસ્તુભસ્વસા ।
સુધાકરાનુજા સુભ્રૂઃ સુજાતા સોમભૂષણા ॥ ૭૯॥

કાલી કલાપિની કાન્તિઃ કૌશેયામ્બરમણ્ડિતા ।
શશક્ષતજસંરક્તચન્દનાલિપ્તગાત્રકા ॥ ૮૦॥

મઞ્જીરમણ્ડિતપદા મઞ્જુવાક્યા મનોરમા ।
ગાયત્ર્યર્થસ્વરૂપા ચ ગાયત્રી ગોગતિપ્રદા ॥ ૮૧॥

ધન્યાઽક્ષરાત્મિકા ધેનુઃ ધાર્મિકા ધર્મવર્ધિની ।
એલાલકાઽપ્યેધમાનકૃપા કૃસરતર્પિતા ॥ ૮૨॥

કૃષ્ણા કૃષ્ણાલકા કૃષ્ટા કષ્ટઘ્ની ખણ્ડિતાશરા ।
કલાલાપા કલહકૃદ્દૂરા કાવ્યાબ્ધિકૌમુદી ॥ ૮૩॥

અકારણા કારણાત્મા કારણાવિનિવર્તિની ।
કવિપ્રિયા કવનદા કૃતાર્થા કૃષ્ણભામિની ॥ ૮૪॥

રુક્મિણી રુક્મિભગિની રુચિરા રુચિદા રુચિઃ ।
રુક્મપ્રિયા રુક્મભૂષા રૂપિણી રૂપવર્જિતા ॥ ૮૫॥પૃ
અભીષ્મા ભીષ્મતનયા ભીતિહૃદ્ભૂતિદાયિની ।
સત્યા સત્યવ્રતા સહ્યા સત્યભામા શુચિવ્રતા ॥ ૮૬॥

સમ્પન્ના સંહિતા સમ્પત્ સવિત્રી સવિતૃસ્તુતા ।
દ્વારકાનિલયા દ્વારભૂતા દ્વિપદગા દ્વિપાત્ ॥ ૮૭॥

એકૈકાત્મૈકરૂપૈકપત્ની ચૈકેશ્વરી પ્રસૂઃ ।
અજ્ઞાનધ્વાન્તસૂર્યાર્ચિઃ દારિદ્ર્યાગ્નિઘનાવલી ॥ ૮૮॥

પ્રદ્યુમ્નજનની પ્રાપ્યા પ્રકૃષ્ટા પ્રણતિપ્રિયા ।
વાસુદેવપ્રિયા વાસ્તુદોષઘ્ની વાર્ધિસંશ્રિતા ॥ ૮૯॥

વત્સલા કૃત્સ્નલાવણ્યા વર્ણ્યા ગણ્યા સ્વતન્ત્રિકા ।
ભક્તા ભક્તપરાધીના ભવાની ભવસેવિતા ॥ ૯૦॥

રાધાપરાધસહની રાધિતાશેષસજ્જના ।
કોમલા કોમલમતિઃ કુસુમાહિતશેખરા ॥ ૯૧॥

કુરુવિન્દમણિશ્રેણીભૂષણા કૌમુદીરુચિઃ ।
અમ્લાનમાલ્યા સમ્માનકારિણી સરયૂરુચિઃ ॥ ૯૨॥

કટાક્ષનૃત્યત્કરુણા કનકોજ્જ્વલભૂષણા ।
નિષ્ટપ્તકનકાભાઙ્ગી નીલકુઞ્ચિતમૂર્ધજા ॥ ૯૩॥

વિશૃઙ્ખલા વિયોનિસ્થા વિદ્યમાના વિદાંવરા ।

શૃઙ્ગારિણી શિરીષાઙ્ગી શિશિરા શિરસિ સ્થિતા ॥ ૯૪॥

સૂર્યાત્મિકા સૂરિનમ્યા સૂર્યમણ્ડલવાસિની ।
વહ્નિશૈત્યકરી વહ્નિપ્રવિષ્ટા વહ્નિશોભિતા ॥ ૯૫॥

નિર્હેતુરક્ષિણી નિષ્કાભરણા નિષ્કદાયિની ।
નિર્મમા નિર્મિતજગન્નિસ્તમસ્કા નિરાશ્રયા ॥ ૯૬॥

નિરયાર્તિહરી નિઘ્ના નિહિતા નિહતાસુરા ।
રાજ્યાભિષિક્તા રાજ્યેશી રાજ્યદા રાજિતાશ્રિતા ॥ ૯૭॥

રાકેન્દુવદના રાત્રિચરઘ્ની રાષ્ટ્રવલ્લભા ।
શ્રિતાચ્યુતપ્રિયા શ્રોત્રી શ્રીદામસખવલ્લભા ॥ ૯૮॥

રમણી રમણીયાઙ્ગી રમણીયગુણાશ્રયા ।
રતિપ્રિયા રતિકરી રક્ષોઘ્ની રક્ષિતાણ્ડકા ॥ ૯૯॥

રસરૂપા રસાત્મૈકરસા રસપરાશ્રિતા ।
રસાતલસ્થિતા રાસતત્પરા રથગામિની ॥ ૧૦૦॥

અશ્વારૂઢા ગજારૂઢા શિબિકાતલશાયિની ।
ચલત્પાદા ચલદ્વેણી ચતુરઙ્ગબલાનુગા ॥ ૧૦૧॥

ચઞ્ચચ્ચન્દ્રકરાકારા ચતુર્થી ચતુરાકૃતિઃ ।
ચૂર્ણીકૃતાશરા ચૂર્ણાલકા ચૂતફલપ્રિયા ॥ ૧૦૨॥

શિખાશીઘ્રા શિખાકારા શિખાવિધૃતમલ્લિકા ।
શિક્ષાશિક્ષિતમૂર્ખાલિઃ શીતાડશીતા શતાકૃતિઃ ॥ ૧૦૩॥

વૈષ્ણવી વિષ્ણુસદૃશી વિષ્ણુલોકપ્રદા વૃષા ।
વીણાગાનપ્રિયા વીણા વીણાધરમુનિસ્તુતા ॥ ૧૦૪॥

વૈદિકી વૈદિકાચારપ્રીતા વૈદૂર્યભૂષણા ।
સુન્દરાઙ્ગી સુહૃત્સ્ફીતા સાક્ષિણી સાક્ષમાલિકા ॥ ૧૦૫॥

ક્રિયા ક્રિયાપરા ક્રૂરા ક્રૂરરાક્ષસહારિણી ।
તલ્પસ્થા તરણિસ્થાના તાપત્રયનિવારિણી ॥ ૧૦૬॥

તીર્ણપ્રતિજ્ઞા તીર્થેશી તીર્થપાદા તિથિપ્રિયા ।
ચર્યા ચરણદા ચીર્ણા ચીરાઙ્ગા ચત્વરસ્થિતા ॥ ૧૦૭॥

લતા લતાઙ્ગી લાવણ્યા લઘ્વી લક્ષ્યાશરાલયા ।
લીલા લીલાહતખલા લીના લીઢા શુભાવલિઃ ॥ ૧૦૮॥

લૂતોપમાના લૂનાઘા લોલાઽલોલવિભૂતિદા ।
અમર્ત્યા મર્ત્યસુલભા માનુષી માનવી મનુઃ ॥ ૧૦૯॥

સુગન્ધા સુહિતા સૂક્ષ્મા સૂક્ષ્મમધ્યા સુતોજ્જ્વલા ।
મણિર્મણિમતી મઞ્જુગમના મહિતા મુનિઃ ॥ ૧૧૦॥

મિતાઽમિતસુખાકારા મીલિતા મીનલોચના ।
ગોમતી ગોકુલસ્થાના ગોદા ગોકુલવાસિની ॥ ૧૧૧॥

ગજેન્દ્રગામિની ગમ્યા માદ્રી માયાવિની મધુઃ ।
ત્રિલોચનનુતા ત્રિષ્ટુબનષ્ટુપ્પઙ્ક્તિરૂપિણી ॥ ૧૧૨॥

દ્વિપાત્ત્રિપાદષ્ટપદી નવપાચ્ચ ચતુષ્પદી ।
પઙ્ક્ત્યાનનોપદેષ્ટ્રી ચ શારદા પઙ્ક્તિપાવની ॥ ૧૧૩॥

શેખરીભૂતશીતાંશુઃ શેષતલ્પાધિશાયિની ।
શેમુષી મુષિતાશેષપાતકા માતૃકામયી ॥ ૧૧૪॥

શિવવન્દ્યા શિખરિણી હરિણી કરિણી સૃણિઃ ।
જગચ્ચક્ષુર્જગન્માતા જઙ્ગમાજઙ્ગમપ્રસૂઃ ॥ ૧૧૫॥

સર્વશબ્દા સર્વમુક્તિઃ સર્વભક્તિસ્સમાહિતા ।
ક્ષીરપ્રિયા ક્ષાલિતાઘા ક્ષીરામ્બુધિસુતાઽક્ષયા ॥ ૧૧૬॥

માયિની મથનોદ્ભૂતા મુગ્ધા દુગ્ધોપમસ્થિતા ।
વશગા વામનયના હંસિની હંસસેવિતા ॥ ૧૧૭॥

અનઙ્ગાઽનઙ્ગજનની સુતુઙ્ગપદદાયિની ।
વિશ્વા વિશ્વેડિતા વિશ્વધાત્રી વિશ્વાધિકાર્થદા ॥ ૧૧૮॥

ગદ્યપદ્યસ્તુતા ગન્ત્રી ગચ્છન્તી ગરુડાસના ।
પશ્યન્તી શૃણ્વતી સ્પર્શકર્ત્રી રસનિરૂપિણી ॥ ૧૧૯॥

ભૃત્યપ્રિયા ભૃતિકરી ભરણીયા ભયાપહા ।
પ્રકર્ષદા પ્રસિદ્ધેશા પ્રમાણં પ્રમિતિઃ પ્રમા ॥ ૧૨૦॥

આકાશરૂપિણ્યધ્યસ્તા મધ્યસ્થા મધ્યમા મિતિઃ ।
તલોદરી તલકરી તટિદ્રૂપા તરઙ્ગિણી ॥ ૧૨૧॥

અકમ્પા કમ્પિતરિપુઃ જમ્ભારિસુખદાયિની ।
દયાવિષ્ટા શિષ્ટસુહૃત્ વિષ્ટરશ્રવસઃપ્રિયા ॥ ૧૨૨॥

હૃષીકસુખદા હૃદ્યાઽભીતા ભીતાર્તિહારિણી ।
માતા મનુમુખારાધ્યા માતઙ્ગી માનિતાખિલા ॥ ૧૨૩॥

ભૃગુપ્રિયા ભ્રૃગુસુતા ભાર્ગવેડ્યા મહાબલા ।
અનુકૂલાઽમલતનુઃ લોપહીના લિપિસ્તુતા ॥ ૧૨૪॥

અન્નદાઽન્નસ્વરૂપઽન્નપૂર્ણાઽપર્ણા ઋણાપહા ।
વૃન્દા વૃન્દાવનરતિઃ બન્દીભૂતામરીસ્તુતા ॥ ૧૨૫॥

તેજસ્વિની તુર્યપૂજ્યા તેજસ્ત્રિતયરૂપિણી ।
ષડાસ્યજયદા ષષ્ઠી ષડૂર્મિપરિવર્જિતા ॥ ૧૨૬॥

ષડ્જપ્રિયા સત્ત્વરૂપા સવ્યમાર્ગપ્રપૂજિતા ।
સનાતનતનુસ્સન્ના સમ્પન્મૂર્તિઃ સરીસૃપા ॥ ૧૨૭॥

જિતાશા જન્મકર્માદિનાશિની જ્યેષ્ઠરૂપિણી ।
જનાર્દનહૃદાવાસા જનાનન્દા જયાઽજનિઃ ॥ ૧૨૮॥

વાસના વાસનાહન્ત્રી વામા વામવિલોચના ।
પયસ્વિની પૂતતનુઃ પાત્રી પરિષદર્ચિતા ॥ ૧૨૯॥

મહામોહપ્રમથિની મહાહર્ષા મહાધૃતિઃ ।
મહાવીર્યા મહાચર્યા મહાપ્રીતા મહાગુણા ॥ ૧૩૦॥

મહાશક્તિર્મહાસક્તિઃ મહાજ્ઞાના મહારતિઃ ।
મહાપૂજ્યા મહેજ્યા ચ મહાલાભપ્રદા મહી ॥ ૧૩૧॥

મહાસમ્પન્મહાકમ્પા મહાલક્ષ્યા મહાશયા ।
મહારૂપા મહાધૂપા મહામતિર્મહામહા ॥ ૧૩૨॥

મહારોગહરી મુક્તા મહાલોભહરી મૃડા ।
મેદસ્વિની માતૃપૂજ્યા મેયા મા માતૃરૂપિણી ॥ ૧૩૩॥

નિત્યમુક્તા નિત્યબુદ્ધા નિત્યતૃપ્તા નિધિપ્રદા ।

નીતિજ્ઞા નીતિમદ્ગન્ધ્યા નીતા પ્રીતાચ્યુતપ્રિયા ॥ ૧૩૪॥

મિત્રપ્રિયા મિત્રવિન્દા મિત્રમણ્ડલશોભિની ।
નિરઙ્કુશા નિરાધારા નિરાસ્થાના નિરામયા ॥ ૧૩૫॥

નિર્લેપા નિઃસ્પૃહા નીલકબરી નીરજાસના ।
નિરાબાધા નિરાકર્ત્રી નિસ્તુલા નિષ્કભૂષિતા ॥ ૧૩૬॥

નિરઞ્જના નિર્મથના નિષ્ક્રોધા નિષ્પરિગ્રહા ।
નિર્લોભા નિર્મલા નિત્યતેજા નિત્યકૃપાન્વિતા ॥ ૧૩૭॥

ધનાઢ્યા ધર્મનિલયા ધનદા ધનદાર્ચિતા ।
ધર્મકર્ત્રી ધર્મગોપ્ત્રી ધર્મિણી ધર્મદેવતા ॥ ૧૩૮॥

ધારા ધરિત્રી ધરણિઃ ધુતપાપા ધુતાશરા ।
સ્ત્રીદેવતાઽક્રોધનાથાઽમોહાઽલોભાઽમિતાર્થદા ॥ ૧૩૯॥

કાલરૂપાઽકાલવશા કાલજ્ઞા કાલપાલિની ।
જ્ઞાનિધ્યેયા જ્ઞાનિગમ્યા જ્ઞાનદાનપરાયણા ॥ ૧૪૦॥

ઇતિ શ્રીનારદીયોપપુરાણાન્તર્ગતં શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રં ૨ સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIlakShmIsahasranAmastotram 2 ..
Searchable pdf was typeset using generateactualtext feature of XeLaTeX 0.99996
on October 6, 2017

Please send corrections to *sanskrit@cheerful.com*